# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.-3.5.10** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ३०/११/२०१६ सन्दर्भग्रन्थः – अवयवः

---

विभागः-१

प्रश्नः-१ द्वयोः व्याख्या विशदतया दत्त। (०८)

(१) 'समस्तरूपोपपन्ने'ति न्यायलक्षणं प्रतिपाद्य दोषं प्रदर्शयत।

(२) "उचितानुपूर्वीकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम्" पङ्क्ति यथागादाधरि विवेचयत।

(३) परार्थानुमानस्वरूपं दर्शयत।

प्रश्नः-२ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) न्यायस्तदवयवनिरूपणस्यावश्यकत्वसङ्गतिं विवृणुत।

(२) अनुमानस्वरूपं व्याख्यात।

प्रश्नः-३ द्वयोः एकवाक्येन उत्तरं ददातु। (०२)

(१) न्यायलक्षणं किम्?

(२) उचितानुपूर्वी का?

(३) दीधितिकारस्य नाम किम्?

प्रश्नः-४ द्वयोः एकैकवाक्येन उत्तरं लिखत । (०२)

(१) का नाम आनुपूर्वी?

(२) प्रतिज्ञादयः कथं वाच्याः?

(३) सद्धेतोः पञ्चरूपाणि कानि?

विभागः-२

प्रश्नः-५ द्वयोः व्याख्या विशदतया दत्त। (०८)

(१) उचितानुपूर्वीकत्वं स्पष्टं विवृणुत।

(२) अवयवानां परिचयः।

(३) 'न्यायान्तर्गतत्वम्'।

प्रश्नः-६ द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) मण्युक्तावयवलक्षणं सदलकृत्यं लिखत।

(२) 'न्यायान्तर्गतत्वे सति प्रतिज्ञाद्यन्यतमत्वं' इति दीधितिं व्याख्यात।

प्रश्नः-७ द्वयोः टिप्पणी कार्या। (०४)

(१) "परार्थानुमानम्"।

(२) "प्रयोजकत्वम्"।

(३) "लिङ्गम्"।

प्रश्नः-८ पञ्च एकैकवाक्येनोत्तरत। (०५)

(१) वीप्सायाः अर्थः कः?

(२) न्यायघटकं वाक्यं किमुच्यते?

(३) न्यायसाध्यत्वं नाम?

(४) 'अत्रैव वाक्ये अतिव्याप्तेः' कुत्र?

(५) अनुमितिं प्रति प्रतिबन्धकः कः?

(६) उदासीनवाक्यम् किम्?

(७) अवयवाः कुत्र उपयुज्यन्ते?

## विभागः-३

प्रश्नः-९ द्वयोः व्याख्यां विशदतया दत्त। (०८)

(१) सूत्रकारीयप्रतिज्ञालक्षणे दोषं प्रदर्श्य मणिं व्याख्यात।

(२) दीधितेः प्रतिज्ञालक्षणं प्रतिपादायत।

(३) अनतिरिक्तपदस्य मिश्रोक्तं प्रयोजनं विशदयत ।

प्रश्नः-१० द्वयोरेकस्य विस्तृतव्याख्या देया। (०८)

(१) प्रतिज्ञाद्यघटकत्वं केचिन्मतरीत्या विशदयत।

(२) उभयघटकभागद्वयाघटितत्त्वम् परिष्कुरुत।

प्रश्नः-११ द्वयोः टिप्पणीं दत्त। (०४)

(१) न्यायान्तर्गतत्वस्यावश्यकता वर्तते न वा स्पष्टयत।

(२) गङ्गेशोपाध्यायः।

(३) साध्यनिर्देशः प्रतिज्ञा।

प्रश्नः-१२ पञ्चानां समाधानानि एकैकवाक्येन लिखत । (०५)

(१) पदार्थतावच्छेदकजातौ हेत्वर्थस्यान्वयायोगाच्चेति वाक्यं कस्य?

(२) निगमनं परामर्शहेतुर्न वा?

(३) पृथिवीतरेभ्यो भिद्यते गन्धवत्वादित्यत्र हेतुः कः?

(४) लिङ्गं किम्?

(५) हेत्वभिधानप्रयोजकजिज्ञासाजनकवाक्यत्वमिति कस्य लक्षणम्?

(६) प्रतिज्ञायाः सूत्रं किम्?

(७) केवलान्वयिनः उदाहरणं किम्?

★★★

समाधानानि

कक्षा – शास्त्रितृतीयवर्षम् (SEM-3) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – नव्यन्यायः **कोड – C.C.-3.5.10** समयः – ११ तः ०२ पर्यन्तम्

दिनाङ्कः – ३०/११/२०१६ सन्दर्भग्रन्थः – अवयवः

प्रश्नः - ३

१. अनुमितिचरमकारणलिङ्गपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यं न्यायः।

२. प्रतिज्ञोत्तरहेतूत्तरोदाहृतणोत्तरोपनयनोत्तरनिगमनत्वरूपा।

३. रघुनाथशिरोमणिः।

प्रश्नः - ४

१. वर्णविशेषः।

२. साध्यादिविशेषनियन्त्रिताः।

३. पक्षसत्त्वसपक्षसत्त्वविपक्षासत्त्वाऽबाधितत्त्वाऽसत्प्रतिपक्षितत्त्वानि।

प्रश्नः - ६

१. व्यापकत्वम्।

२. अवयवः।

३. न्यायप्रयोज्यत्वम्।

४. समस्तरूपोपपन्नलिङ्गप्रतिपादकमित्यत्र।

५. बाधज्ञानम्।

६. न्यायानन्तर्गतम्।

७. परार्थानुमाने।

प्रश्नः - १२

(१) दीधितिकारस्य।

(२) न।

(३) गन्धवत्त्वम्।

(४) लिङ्गत्वं व्याप्तिरित्यर्थः।

(५) प्रतिज्ञायाज्ञ् लक्षणान्तरम्।

(६) साध्यनिर्देशः प्रतिज्ञा।

(७) सर्वमभिधेयं प्रमेयत्वात् इति।